अस्याम् प्रश्नपत्रपुस्तिकायाम् 41 प्रश्नाः एवम् 15 मुद्रित पृष्ठाः सन्ति।

Roll No.
अनुक्रमाङ्कः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

**Code No. 67/SS/A/S**
**कोड नं०**

**Set / सेट** **A**

# SANSKRIT
# संस्कृतम्
# (309)

Day and Date of Examination ..............................................................................
(परीक्षादिवसः दिनाङ्कश्च)

Signature of Invigilators 1. ..............................................................................
(निरीक्षकयोः हस्ताक्षरम्)

2. ..............................................................................

---

**सामान्य अनुदेशाः —**

1. परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व-अनुक्रमाङ्कम् अवश्यं लिखतु।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम्।
3. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
4. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कोड संख्या 67/SS/A/S, सेट A अवश्यमेव लेखनीया।

# SANSKRIT

# संस्कृतम्

# (309)

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hours) पूर्णाङ्काः (Full Marks)—100

**निर्देशाः**— (i) अस्मिन् प्रश्नपत्रे आहत्य 41 प्रश्नाः सन्ति ।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

(iii) **समे** प्रश्नाः अनिवार्याः।

(iv) वैकल्पिकभागयोः एकः समाधेयः। (प्रश्न संख्या—33–41)

(1) Answers of all questions are to be given in the Answer-Book given to you.
सभी प्रश्नों के उत्तर आपको दी गई उत्तर-पुस्तिका में ही लिखें।

(2) 15 minute time has been allotted to read this question paper. The question paper will be distributed at 2:15 p.m. From 2:15 p.m. to 2:30 p.m., the students will read the question paper only and will not write any answer on the Answer-Book during this period.
इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण दोपहर में 2:15 बजे किया जाएगा। दोपहर 2:15 बजे से 2:30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।

**[A]** अधोलिखितेषु युक्तं विकल्पं चिनुत— 1×15=15

**1.** *(i)* विक्रमादित्यः कम् आश्रित्य रात्रौ स्थितः? 1

(क) सिंहासनम् (ख) महारण्यमध्ये

(ग) वृक्षस्य मूलम् (घ) स्वभवने

**अथवा**

*(ii)* कस्य राज्ये कोऽपि पापकर्मनिरतः नासीत्?

(क) भोजस्य (ख) पुत्तलिकायाः

(ग) राक्षसस्य (घ) विक्रमस्य

**2.** *(i)* महीधराणां शृङ्गेषु विश्रम्य के प्रयान्ति? 1

(क) मानवाः (ख) नक्षत्राणि

(ग) साधवः (घ) वारिधराः

**अथवा**

*(ii)* वर्षायाः वेगेन प्रनष्टकूलाः काः प्रवान्ति?

(क) नद्यः (ख) तटाः

(ग) वृक्षाः (घ) मेघाः

**3.** 'अर्वते' इति शब्दस्य कः अर्थः? 1

(क) अश्वाय (ख) मानवाय

(ग) वानराय (घ) सूर्याय

**4.** कष्टं न्यासस्य रक्षणम्—कस्य नाटकस्य अंशः? 1

(क) अभिज्ञानशाकुन्तलम् (ख) उत्तररामचरितम्

(ग) मुद्राराक्षसम् (घ) मृच्छकटिकम्

**5.** *(i)* 'हृदयपरिवर्तनम्' इति नाट्यांशे कस्य अद्भुतबलिदानं वर्णितम्? 1

(क) बोधिसत्त्वस्य (ख) गोपालकस्य

(ग) यक्षस्य (घ) द्वारपालस्य

**अथवा**

*(ii)* ''अहो, अयमेव सुहृत् य सुहृदो दुःखेन स्वयं दुःखी भवति'' इति कैः भणितम्?

(क) भोजेन (ख) बकासुरेण

(ग) पक्षिभिः (घ) नगरवासिभिः

**6.** बलरामेण सह दामोदरं कः हन्तुम् इच्छति? 1

(क) राजा कंसः (ख) भटः ध्रुवसेनः

(ग) चाणूरः (घ) मुष्टिकः

**7.** *(i)* हिमालयः कस्य मानदण्डः? 1

(क) नभसः (ख) जलस्य

(ग) समुद्रस्य (घ) पृथिव्याः

**अथवा**

*(ii)* तिलेषु किं भवति?

(क) तैलम् (ख) जलम्

(ग) दुग्धम् (घ) अमृतम्

**8.** ''सूर्यसमं ज्योतिः किंस्वित्'' इति कस्य वेदस्य मंत्रः? 1

(क) अथर्ववेदस्य (ख) सामवेदस्य

(ग) ऋग्वेदस्य (घ) यजुर्वेदस्य

**9.** *(i)* ''सर्वेषां प्राणिनां रक्षा करणीया''—केन उक्तम्? 1

(क) राज्ञा (ख) पुत्तलिकया

(ग) ब्राह्मणेन (घ) राक्षसेन

**अथवा**

*(ii)* विदूषकः कः कथ्यते?

(क) दुष्टजनः (ख) विद्वज्जनः

(ग) नायकस्य विद्वत्मित्रम् (घ) नायकस्य मूर्खमित्रम्

**10.** सुश्रुतः कस्य पुत्रः आसीत्? 1

(क) चरकस्य (ख) वाल्मीकेः

(ग) परशुरामस्य (घ) विश्वामित्रस्य

**11.** *(i)* ''एको हि दोषो गुणसन्निपाते''—एकः दोषः कः? 1

(क) हिमम् (ख) दुर्गम्

(ग) उच्चशिखरम् (घ) अन्धकारः

**अथवा**

*(ii)* कस्य गंधः सर्वत्र व्याप्तः भवति?

(क) हिमस्य (ख) गजस्य

(ग) वृक्षाणाम् (घ) दुग्धस्य

**12.** 'सत्यवाक्' पदस्यार्थः कः? 1

(क) सत्यं च वाक् च (ख) सत्यम् इव वाक्

(ग) सत्यस्य वाक् (घ) सत्या वाक् यस्य सः

**13.** अधोलिखितं कथनं कः कं प्रति कथयति? 1

''भवान् तदर्थं क्षमस्व नः अपराधम्।''

(क) पञ्चयक्षाः–राजानं मैत्रबलं प्रति (ख) मंत्री–राजानं प्रति

(ग) मैत्रबलः–मंत्रिणं प्रति (घ) ब्राह्मणः–राजानं प्रति

**अथवा**

''न मे रोचते जीवहिंसा।''

(क) राजा मैत्रबलः–आत्मानं प्रति (ख) राजा–द्वारपालं प्रति

(ग) मंत्री–राजानं प्रति (घ) मैत्रबलः–मंत्रिणं प्रति

**14.** 'महत्सु' इति कीदृशं रूपम्? 1

(क) द्वितीयाविभक्ति-एकवचनम् (ख) सप्तमीविभक्ति-बहुवचनम्

(ग) पञ्चमीविभक्ति-बहुवचनम् (घ) चतुर्थीविभक्ति-बहुवचनम्

**15.** *(i)* 'किम्' शब्दस्य पुंलिङ्गे तृतीयाविभक्ति-एकवचने किं रूपम्? 1

(क) कस्य (ख) कस्मात्

(ग) केन (घ) कस्मिन्

**अथवा**

*(ii)* 'घनोपगूढम्' समुचितं सन्धिविच्छेदं चिनुत—

(क) घन् + ओपगूढम् (ख) घनू + उपगूढम्

(ग) घन + उपगूढम् (घ) घनु + उपगूढम्

**16.** अधोलिखितेषु सत्यम् असत्यं **वा** इति चिनुत— 4

(क) सूर्येण समं ज्योतिः ब्रह्म अस्ति।

(ख) हिमेन हिमालयस्य सौन्दर्यं नश्यति।

(ग) कल्पनायाः वैमानिक्यां विशिष्टा रुचिः आसीत्।

(घ) तेजोमण्डलं विकारेभ्यः रक्षणीयम्।

**अथवा**

(क) भागवतपुराणे द्रुमाः दीनाः कथिताः।

(ख) राकेश शर्मा इति नामकः अन्तरिक्षयात्री न अभवत्।

(ग) पतन्ति परपीडकाः इति नाट्यांशः 'बालचरितम्' नाटकात् संगृहीतः।

(घ) बकासुरः प्रतिदिनं जनान् भक्षयति।

**17.** सन्धिं सन्धिविच्छेदं **वा** कुरुत— 4

(क) एक + एकः

(ख) तुष्टोऽस्मि

(ग) अति + उत्तमा

(घ) तैर्न्यस्तम्

**अथवा**

(क) यस्य + आतपवन्ति

(ख) सतीव

(ग) पर + अर्थे

(घ) प्रविश्योपविशति

**18.** अधोरेखाङ्कितं पदम् अनुसृत्य प्रश्ननिर्माणं कुरुत— 4

(क) वृक्षमूले स्थितः राजा तद्वचः शृणोति।

(ख) शल्यचिकित्सकैः व्रण–सीवनार्थं सूच्यः प्रयुज्यन्ते।

(ग) मैत्री एव तस्य राज्ञः बलम्।

(घ) बकासुरः प्रतिदिनं जनान् भक्षयति।

**अथवा**

(क) त्वं पुनरधिकां कान्तिं प्राप्य प्रहससि।

(ख) कंसः अतीव प्रजापीडकः आसीत्।

(ग) सुश्रुतस्य अद्यतन-ख्यातिः नासाप्रतिष्ठापनेन कारणेन अस्ति।

(घ) चारुदत्तस्य मित्रं मैत्रेयः नाम विदूषकः।

**19.** अधोलिखितेषु प्रकृति-प्रत्यय-योजनं विभाजनं **वा** कुरुत— 4

(क) प्रहसन् _____+ _____ + _____

(ख) वि. √हा ल्यप् _____

(ग) विनेतुम् _____ + _____ +

(घ) करणीयम् _____ + _____

**अथवा**

(क) अप + नी + ल्यप्—

(ख) उक्त्वा _____ + _____ +

(ग) गतवान् _____ + _____

(घ) जातम् _____ + _____

**20.** उदाहरणानुसारम् अधोलिखितानां शब्दानां विभक्तिं वचनं च युक्तं रूपं लिखत (**पञ्चैव**)— 1×5=5

| | **शब्दः** | **विभक्तिः वचनम्** | **रूपम्** |
|---|---|---|---|
| | उदा० रमा | चतुर्थी-एकवचनम् | रमायै |
| (क) | भवत् (पुं०) | षष्ठी-एकवचनम् | ______ |
| (ख) | मातृ | द्वितीया-एकवचनम् | ______ |
| (ग) | लब्धवत् (स्त्रीलिङ्गम्) | प्रथमा-एकवचनम् | ______ |
| (घ) | इदम् (स्त्रीलिङ्गम्) | तृतीया-बहुवचनम् | ______ |
| (ङ) | गुरु | चतुर्थी-एकवचनम् | ______ |
| (च) | विद्वस् (पुं०) | प्रथमा-बहुवचनम् | ______ |

**21.** उचितेन धातुरूपेण वाक्यपूर्तिं कुरुत (**पञ्चैव**)— 1×5=5

(क) एष महाराजा ______ (स्था-लट्)

(ख) सम्मुखम् आयातं जनं कः ______ (भक्ष्-लट्)

(ग) आकाशमण्डले ग्रहनक्षत्राणि ______ (भू-लट्)

(घ) पर्यावरणसंरक्षणेन जीवनं सुखमयं भवितुं ______ (शक्-लट्)

(ङ) त्वं तस्य पुण्यफलं ______ (दृश्-लोट्)

(च) भवन्तः मद्यपानं निन्दितवचनानि च विषवत् ______ (त्यज्-लोट्)

**[B]** द्वयोः प्रश्नयोः यथानिर्देशम् उत्तराणि लिखत— 2×2=4

**22.** (क) 'काले फलति सौभाग्यम्'—नाटकस्य मूलशीर्षकं किम्?

(ख) अस्मिन् नाटके कस्य रसस्य अनुभूतिः भवति?

**अथवा**

(क) 'कष्टं न्यासस्य रक्षणम्' इति नाटकस्य कः प्रणेता?

(ख) अस्मिन् नाटके सामाजिकरूपं किम्?

**23.** 'पतन्ति परपीडकाः' इति पाठस्य कथानकं कस्मात् ग्रन्थात् उद्धृतोऽस्ति नाटकस्य च कः प्रणेता?

**[C]** पञ्च अनतिदीर्घोत्तरैः समाधत्त— 4×5=20

**24.** 'काले फलति सौभाग्यम्' इति नाटकम् आश्रित्य राज्ञः चरितं वर्णयत।

**अथवा**

'कष्टं न्यासस्य रक्षणम्' नाटकस्य नायकस्य चरितं वर्णयत।

**25.** 'पतन्ति परपीडकाः' इति नाटकम् आश्रित्य कृष्णस्य बालचरितं वर्णयत।

**26.** 'अमृतस्य पन्थाः' इति पाठस्य सारं लिखत।

**27.** 'कल्पनाकीर्तिः विजयते' इति गद्यांशम् आश्रित्य कल्पनाचावलायाः वैमानिकक्षेत्रे योगदानं वर्णयत।

**28.** 'पर्यावरणस्य भीषणा समस्या वर्तते'—इति विषये स्वविचारान् वर्णयत।

**[D]** चत्वारः प्रश्नाः दीर्घोत्तरैः समाधेयाः— 5×4=20

**29.** अधोलिखितं विषयम् अधिकृत्य मञ्जूषासाहाय्येन दशसु वाक्येषु एकम् अनुच्छेदं लिखत—

**'ऋतुराजवसन्तः'**

| मञ्जूषा |
|---|
| भारते, भवन्ति, षड्ऋतवः, ऋतुराजः, कुसुमैः, भ्रमरः, नवीनानि पत्राणि, पुष्पाणि, सुगंधः, मंजर्यः, कोकिला, आकाशः, जीवने, चेतनता, आम्रवृक्षेषु, निर्मलं जलम्। |

**अथवा**

**'मम विद्यालयः'**

| मञ्जूषा |
|---|
| नाम, नगरस्य सर्वश्रेष्ठः, द्विसहस्रसंख्यकाः छात्राः, पञ्चाशत् अध्यापकाः, विभिन्नेषु विषयेषु निष्णाताः, योग्यः, अनुशासनप्रियाः, सुयोग्यः प्राचार्यः, क्रीडाक्षेत्रं विशालम्, हरितम् उद्यानम्, तरणतालम्, उत्तमं परीक्षाफलम्, सांस्कृतिककार्यक्रमाः। |

**30.** भवान् राजकुमारः। भवतां निवासे जलापूर्तिः यदा-कदा बाधिता भवति। तदर्थं जलपरिषदः अध्यक्षं प्रति पत्रं लिखतु।

**31.** 'वार्षिकोत्सवः दिवसः' इति विषयं समाश्रित्य परियोजनाम् एका लिखत।

**32.** संवादलेखनं कुरुत—

भवान् रोगग्रस्तः अस्ति। अतः चिकित्सकस्य समीपं गत्वा कथं संवादं करिष्यति, तदर्थं पञ्चवाक्यानि लिखतु।

**अथवा**

भवतः नाम दिनेशः। ग्रीष्मावकाशे पर्वतीयक्षेत्रयात्रामुपलक्ष्य मित्रेण सह जातसंवादं पञ्चवाक्येषु लिखत।

## खण्ड—ख

### वैकल्पिकभागः—क

### ( संस्कृतं संस्कृतिश्च )

**33.** अधोलिखितेषु युक्तियुक्तं विकल्पं चिनुत— 1

*(i)* 'शर्मण्यदेशः सुतरां विभाति' अस्ति—

(क) यात्राकाव्यम्

(ख) शतककाव्यम्

(ग) दूतकाव्यम्

**अथवा**

*(ii)* 'भाति मे भारतम्' कस्य रचनास्ति?

(क) श्रीनिवासरथस्य

(ख) डा० रामकरणशर्मणः

(ग) डा० रमाकान्तशुक्लस्य

**34.** 'यजुर्वेदस्यानुसारेण अर्बुदम्' भवति— 1

(क) $10^4$

(ख) $10^9$

(ग) $10^7$

**35.** आयुर्वेदस्य प्रमुखग्रन्थः न अस्ति— 1

(क) चरकसंहिता

(ख) भावप्रकाशः

(ग) कृषिपराशरः

**अथवा**

कस्मिन् ग्रन्थे सर्वेषाम् अङ्गानां चिकित्सायाः वर्णनं विद्यते?

(क) भावप्रकाशे

(ख) शब्दप्रदीपे

(ग) अष्टाङ्गसंग्रहे

**36.** 'अंशुभतंत्रम्' कस्य रचना अस्ति? 1

(क) महर्षिभरद्वाजस्य

(ख) महर्षिकण्वस्य

(ग) महर्षिगौतमस्य

(घ) महर्षिकपिलस्य

**37.** 'जानकी जीवनम्' इति कस्य कृतिः? 1

(क) राजेन्द्रमिश्रस्य

(ख) हर्षदेवमाधवस्य

(ग) सत्यव्रतशास्त्रिणः

**38.** अधोलिखितेषु युग्मानां मेलनं कुरुत— 4

| **महाकाव्यम्** | **लेखकः** |
|---|---|
| (क) इन्दिरागाँधीचरितम् | *(i)* डा० रामकरणशर्मा |
| (ख) स्वातन्त्र्यसम्भवम् | *(ii)* डा० सत्यव्रतशास्त्री |
| (ग) तदेव गगनं सैव धरा | *(iii)* रेवाप्रसादद्विवेदी |
| (घ) पाथेयशतकम् | *(iv)* श्रीनिवासरथः |

प्रश्नत्रयं समाधेयम्— 2×3=6

**39.** खण्डकाव्यं किं भवति? सोदाहरणं स्पष्टयत।

**अथवा**

'पत्रकाव्यानि' कानि उच्यन्ते? सोदाहरणं स्पष्टयत।

**40.** संस्कृतपत्रिका का? सोदाहरणं लिखत।

**अथवा**

'गद्यकाव्यानि' कानि? संक्षिप्तं विवरणं लिखत।

**41.** 'अष्टाङ्गहृदयम्' इति ग्रन्थस्य विषये संक्षिप्तं विवरणं प्रस्तूयताम्।

**अथवा**

'बृहत्संहितायाः' ग्रन्थस्य विषये संक्षिप्तं विवरणं लिखत।

## वैकल्पिकभागः—ख

## ( प्रयोजनमूलक-संस्कृतम् )

**33.** अधोलिखितेषु युक्ति-युक्तं विकल्पं चिनुत— 1

*(i)* वैदिकशब्दकोषः अस्ति—

(क) ऋग्वेदः

(ख) निघण्टुः

(ग) उपनिषद्

(घ) अमरकोशः

**अथवा**

*(ii)* इतिहासस्य धर्मज्ञानस्य च कोशोऽयं ग्रन्थः—

(क) पञ्चतन्त्रम्

(ख) महाभारतम्

(ग) ब्रह्मसूत्रम्

(घ) अग्निपुराणम्

**34.** कः षष्ठशताब्द्यां शून्य-प्रयोगनियमान् निर्मितवान्? 1

(क) ब्रह्मगुप्तः

(ख) आर्यभट्टः

(ग) श्रीधराचार्यः

(घ) सुश्रुतः

**35.** *(i)* दूरदर्शने संस्कृतवार्ताणां प्रारम्भः कदा अभवत्? 1

(क) 1994

(ख) 1998

(ग) 2002

(घ) 2005

अथवा

*(ii)* कस्मिन् भवने वार्ताकक्षः वर्तते?

(क) सूचनाकक्षे

(ख) सम्पादकस्य कक्षे

(ग) निदेशकस्य कक्षे

(घ) आकाशवाणी-भवने

**36.** ''माता शत्रुः पिता वैरी येन बालो न पाठितः''—इति वाक्यं कस्मात् उद्धृत? 1

(क) महाभारतात्

(ख) पञ्चतन्त्रात्

(ग) रामायणात्

(घ) अर्थशास्त्रात्

**37.** दूरदर्शने संस्कृतचलचित्रं किं प्रसारितं जातम्? 1

(क) सोमप्रभाविवाहः

(ख) आदिशङ्कराचार्यः

(ग) भाति मे भारतम्

**38.** अधोलिखितेषु युग्मानां मेलनं कुरुत— 4

| | | | |
|---|---|---|---|
| (क) | अष्टाङ्गहृदयम् | *(i)* | लौकिक-संस्कृतशब्दकोशः |
| (ख) | शुल्वसूत्रम् | *(ii)* | वैदिक-कोशग्रंथः |
| (ग) | निघण्टुः | *(iii)* | ज्यामिति-गणितविद्या |
| (घ) | अमरकोशः | *(iv)* | चिकित्साग्रंथः |

प्रश्नत्रयं समाधेयम्— 2×3=6

**39.** संस्कृतभाषा कस्मिन् क्षेत्रे जीवनव्यापनार्थम् उपयोगिनी भवति? (क्षेत्रद्वयम्)

**अथवा**

जनसञ्चारमाध्यमान् संक्षिप्तरूपेण लिखत।

**40.** जनसञ्चारस्य विविधवैद्युदान्विक-(इलेक्ट्रानिक मीडिया) माध्यमानां संक्षिप्तं परिचयं लिखत।

**41.** दूरदर्शनस्य प्रसिद्धप्रणालीद्वयं लिखत।

**अथवा**

वार्ताकक्षे वार्तानां निर्माणं केन क्रियते?

★ ★ ★